तो न गतार्थस्तत्राह चित्तनेत्रेणेति भवानन्यस्य सर्गं चित्तरूपेण नेत्रेण पश्यति दृशा चक्षु

सर्गैरेभिर्द्रष्टुं पुत्राणां तोषमेषि जगत्समेतान्देवतो तोषयिष्यंति तं तां सर्गास्त्वं रेश्वर १४ चित्तनेत्रे
णैवान्ये तान्सर्गानिस्मत्सनो दृष्टा अवश्यं चक्षुषा सर्गं सृष्टमिसे चैवेति कः १५ येनैव मनसा
सर्गो निर्मितः परमेश्वरः स एव मांसनेत्रेण तं पश्यति हि नेतरः १६ नचैतान्दृशा संसारान्द
शानीरजसंभवान् कश्चिन्नाशयितुं शक्तश्चित्तदाद्यान्विरसिद्धितान् १७ श्रीरामः सम:

धातुर्नो पश्यति कः तत्स्रष्टा तु स्वचित्तं सर्गमिमं दं सृष्टमिति चक्षुषैवन्नावनुं एवेति अतस्तेस्व
चक्षुर्दर्शनार्हः सर्गो नान्येन गतार्थं दृष्टार्थः १५ तदेवं एव सत्एव मया चक्षुषा दृष्टव्यस्तत्रा
ह येनैवेति १६ सर्वथैवं तदिह स्थाम मन्मनसा दृष्टोऽयमैदव सर्गोऽमित्राणि कूलएवेति मया नाशा
नीयस्तत्राह नचैतानिति द्रष्टोत्तान्संसारांस्तत्र त्वन्दशानी रजसंभवान्प्रजान्वा कश्चिन्नाश
यितुं शक्तः १७

रोद्धुं रोधयितुमिसानमौनर्शयितुमिसर्पः १८ बद्धपूर्वतां रूढमुलत्ता १९ आपनताहिसं
मायानिरसना पस्तत्राह बहुकालेति २० बध्यी हस्थिरीभूतं अतएव हिमकानां समा
प्ति चारएत्त बोधनमेवोपायो न चरणपादिरमङ्गसाहबोधनादिति ॥ लोघनां शि

मौर्छ्रियेयु त्रियतेवद्वोढुं किलयुज्यते नमनोनिश्चयहत्तं कश्चिद्बोधायेत्तुं समः १८ यो
धिपरत्तांमातोऽजंतो मनसि निश्चयः सतेनेव विना अत्यन्तान्येन विषयते १९ बहुकाल
परम्परत्तां मनसादृढनिश्चयं ज्ञापेनापि न तसाप्तिसयोनष्टेपि देहके २० मुधुमपीठ
कमितो मनसि मरूढं तद्रूपमेव पुरुषो भवतीह नान्यत् बोधो धनादित्तरमेवकिला
युपाय शैलौघसकमिव निष्फलमेव मन्ये २१ मोक्षोपाये ऐन्दवनिश्चयकथनं सर्गः
८ ऐन्दवोपाख्यानं संपूर्णं मानुरूं मनो हि जगतां कर्त्त मनो हि पुरुषः परः मनः ह
तं हतं लोके न शरीरहतं हतं १

लाशकलसम तानां अङ्कुरोदये छयासेकमिव नि
ष्फलमेवाहमन्ये २१ इति श्री वासिष्ठतात्पर्यप्रकाशे उत्पत्ति प्रकरणे अष्टाशीतितमः

१ देहभावनयाऽप्ययुक्त इति छेदः मुक्त इति पाठः स्पष्टः धर्मैर्जन्ममरणादिभिः ३ बाह्यदृष्टि
र्देहादावात्मात्मीयदृष्टिर्यस्य सः ४ वक्ष्यमाणकथावक्तृमुपसंहरतीति मनः कारणमिति ५

सामान्यब्रह्मलक्षणं मनसा मनोभावनया किल ऐन्द्रवाग्र्यलतां याता नासमःपक्षपातकृतं २ मनसा
भाव्यमानो हि देवतां यातिदेहकः देहभावनयाऽयुक्तो देहधर्मैर्न बाध्यते ३ बाह्यदृष्टिर्हि नि
यतं सुखदुःखादिविंदति यांतर्मुखतयायोगी हेर्वेत्तिप्रियाप्रिये ४ मनः कारणकं तस्माज्ज
गद्विविधविभ्रमं इंद्रसाहल्ययासार्द्धं चत्रोत्तोत्रनिदर्शनं ५ ब्रह्मोवाच काहल्या नगवन्ना
नोक्तौ वाग्नें इत्यतमो तु द मयोरुदंतत्र्यवणे पावनी दृष्टिरेति हि ६ भानुरूवाः श्रूयते हि पुरा
देवमागधेषु महीपतिः इंद्रद्युम्न इति ख्यात इंद्रद्युम्न इत्यापरः ७ तस्येन्दुबिंबप्रतिमा भार्या
कमललोचना अहल्या नाम तत्रासीद्धंसकस्येव रोहिणी ८ तस्मिन्नेव पुरे षिंगः षिंग
मकरशेखरः इंद्रनाम परः कश्चिद्वाभिन्द्यकुमारकः २॥

उदंतो वृत्तांतस्तस्य श्रवणे
सति ६ अपरः पुराणांतर प्रसिद्ध इंद्रद्युम्नदुर्व ७ ८ षिंगो विटः षिंग इति पाठेपि स एव

टीका: नैषधीयप्र. ११ ८

अहल्या गौतमपत्नी १० संक्रंदनः आसक्तः सन् कुतो नो एति न्यागच्छति सा सुकावलोकिता ११ १२ निदाघेन ग्रीष्मेण तप्ता सा सुस्थलीपु परिलोलामसीव स्मृतिष्माग

अहल्या पूर्वमिंद्रस्य वनवेष्टे सहल्यया स्त्रीतं राजमहिष्याप कथा प्रस्तावतः कश्चित्
१० आकर्ण्यैव सहल्या सा वभ्रवेंद्रानुरागिणी अहल्यां मां स नो कस्मात् सकोऽभ्येतीस
योत्सुका ११ मत्ता लग्ना रक्तदलीपद्मवास्तरणेष्वसा अतप्यत भृशं बालालतात्व
नविनेष्विव १२ खेदमाप समग्रा कृता स्त्रन् पद्मिभिर्भूतिषु मसान्नि दाघतप्तासुपा
रिलोला स्थलीष्विव १३ अथामिंद्रो यमिंद्रम्वेसेवं प्रलापया लज्जापिहितया
सक्ता वेवनूपमनुयातया १४ दूतान्तयाद्युमस्नेहमयतस्मावयस्य या उक्तंतया
प्रिये विघ्नान्ति द्रुमभ्यानयाम्यहं १५ ॥

स्यमस्तानां यत्तपाधामादित्ति यलोपः १३

तयाल्लज्जापिसक्ता अनुयात याऽनुसक्तया १४ अथानंतरं तस्मा वयस्यया नवं विधां
दृष्ट्वा ज्ञात्वा यात्याद्युक्तिकं हे प्रिये सखि अहं इंद्रं अभिमुखं अविघ्नं यथा स्यात्तथा आनयामि ॥ १५ ॥

८

९७९

नलिनी पद्मिनी म्लाना अन्यसा: नलिन्या म्लानं यथा पतन्ति इत्यर्थः १६ १७ १८ १९ एतेन स्

दृष्टं तवानयामीति स्फ[illegible]खा चिरं कासितेक्षणा पपात पादयोः सख्यानलिन्या नलिनी यथा १६ त
तः अयातेर्दिवसे समयातेनि[illegible]गमे सा वसन्तात्मिंद्र स्वयंसयौ द्विजकुमारकं १७ बोधयित्वा
यथा मुक्तं सा तस्मिंश्च समयां राजा अहल्यानिकटं ए आमानयामास सत्वरं १८ ततः सा तेन विधिना
सहेंद्रेण रतिं ययौ कस्मिंश्चित्सदने गुप्ते बहुमाल्यविलेपना १९ हारांगदमनोज्ञेन तत्क्षणे त
न सा तदा एतेना वर्जिता वल्लीरसेन मधुना यथा २० ततस्तदनुरक्ता सा पश्यंतीतन्मयं जगत्
न समस्त गुणक्रीर्णा भर्तारं बहुमन्यत २१ केन चित्त्वथ कालेन तत्सा इंद्रानुरागिणा साज्ञा
ता राज्ञा संहेन तन्मुखव्योमचंद्रिका २२ इंद्रं ध्यायति सा यावत्तावत्सा विराजते मुखं पूर्णेन
चंद्रेण प्रबुद्धमिव कैरवं २३ इंद्रोपि च तदासक्तः समस्तकारणकुलः नातिष्ठति क्षणमहो त
या विरहितः क्वचित् २४

एतोचित्तक्रीडनेन आवर्जिता वल्लीरहता मधुना वसंतेन। २०
२१ तन्मुखव्योमन्यंद्रिकेव प्रकार हेतुः २२ तेदेवस्पष्टमाह इंद्रमिति। २४॥ श्रीरामः॥

अतिशय्यितेन सुघनेन निरंतरेण चक्लेहेन निशावरणे : अपगछन्नाञ्छेष्टायमयोस्तयोः क
द्वाःदुःसहाव्यथायस्मात्सः २५ श्वासनं पीडनं २६ तदेवविशिष्ट्यदर्शयति तावित्यादिना
तत्रलौकिकेऽसत्तेकुस्सितेतेपिविषयेचित्तस्थैर्येयदानदुःखंसुखसंपत्तिश्च तदापर

३

अथातिसुघनस्नेहनिशावरणेचेष्टयोः तयोरनयदवांतोराज्ञोकर्णिकदुःस्थः २५ ए
वमन्योन्यमासक्तभावमालस्यनेपतिः चक्रारखकुणिद्वंद्वैः सदयोथश्वासनं २६ तावु
भावपि संसक्तौ हेमंतेसलिलाश्रयेलुष्टेअहसतुस्तत्रनखेदंसमुपागतो २७ अपछ
तौ ततो राज्ञा रविन्दोःस्थौनलदुर्मती भवस्त्वत्समहीपालंज्ञोलाश्रयसमुद्भवौ २८ सं
स्मृत्वावामिहान्योन्यमुखकांतिमनिंदितौ आत्मानंनविजानीवोरूढभावंपरस्परं २९

४

मात्मन्नित्तस्थैर्यंतत्प्रसक्ति संभावनापि दूरं निरस्तानिरश्रयानं दावास्ति प्रसवतः सिद्धेति
तासमर्रहसंसचयंसतयोश्चित्तस्थैर्यफलद्वयंप्रपंचयतितद्दावित्यादिना २७ २८
आत्मानं स्वदेहं रूढभावमितिक्रियाविशेषणं २९ ॥ श्रीरामसमर्थ जयजयरामः

वृषभस्याद्यावयोः संगो मनः संवेधि प्रसंक्तः मेदश्न्यस्तेन हेतुनात्यन्तलतेषु शासनेषु पीडनेषु हा
र्षितो स्त्रः नमुख्य वश्य २० एवं पूर्वोक्तिरीत्यैवोचतुः २१ २२ २३ २४ दुःखानि दुःखहेतुत

शासनेषु च यः संगो निःशंकस्तेन हर्षितौ मुख्यावेन महीपालस्यांगे रपि विक्रान्तितैः २०
ततो न्याद्ध्रपरिक्षिप्तमावखिन्नावेवमेवतौ ऊचतुर्मुदितात्मानावन्योन्यस्मात्तिहर्षितौ २१
क्षिप्तौ गजपादेषु नाखिन्नावेवसंस्थितौ एवमेवोचतुर्भूपमन्योन्यस्मात्तिहर्षितौ २२ क्रो
शाहतावखिन्नौ तावेवमेवाकिलोचतुः अन्यस्माच्छासनाद्रान्नाकल्पितात्स्व पुनः पुनः २३
उद्भूतावूचतुः पश्चैत्तमेवार्थं पुनः पुनः उवाचेन्द्रो महीपालं जगन्मेरपितामयं २४ न शा
सनान्निदुःखान्निदुःखानि बाधन्ते किंचिदेव मे अस्माभिर्वजनाद्राजन्सर्वमन्यमेव च २५
तेनान्यशासनात् दुःखं किंचिदेव न विद्यते मनोमात्रमहं राजन्मनोहि पुरुषः स्मृतः २६
सर्पं च मात्रमेवायं देहो दग्धस्त एव हि समकालमनुक्तेन सहसा दंडशासिना ॥ २७ ॥ श्री

मपि शरीरस्याततानानि किंचिन्न बाधन्त एवेति योजना २५ अन्यशासनात् अन्यशासना

तु अन्यस्मात्सीभग्नादर्पिनाविपतेआवयोरितिशेषः ३६ प्रपंचकल्पितोविस्तारः मनसएवे
सर्वः मनएवाहित्ताहर्दृइडे नैस्सामितत्वाहसमकालेतिसमशब्दएकपरः ३७॥ वारंदृष्टा

वारंमनोभेदयितुंमनागपिनशक्यतेकोनामत्वामहाराजक्रोधवृषःकस्यशक्यः ३८ यानिम
नांसिभिधीतेवष्टनिस्प्रमपंसपि हृद्भिमायात्तवादेहोयानुचाविशरारुत्तो ३९ भावितार्था
भिपत्तिंमनस्तिष्ठतिपूर्ववत् दृष्टेयेचिरमाविष्टंस्थानंतत्स्थितंमनः ४० भावाभावः शरी
रस्थानपशक्तोनवाधितुं भावितंतीव्रवेगेनमनसायन्महापते ४१ तदेवपन्नगस्यचलंनुशरी
रविचेष्टितं नकान्यंनकिमाराजन्वरशापादिकाअपि ४२ तीव्रवेगेनसंपन्नशक्तोनाबालयि
तुंमनः तीव्रवेगेनसंयुक्तंपुरुषासभिवांछितात् ४३ मनश्चालयितुंशक्तोनमहाद्रिंमृगा
इव ममेयमसितापांगीमनः कोरेपिनिष्ठिता ४४ देवागारेमहोत्सवेदेवीभगवतीयथा नदु
खमनुगच्छामिप्रियाजीवरक्षया ४५ गिरिग्रीष्मदवाग्निदाहेलग्नयेवाद्यमालया यत्रयत्र
मयाराजंस्तिष्ठाम्यभिपताभिवा ४६॥

श्लोर्यभरं ३८ दृष्टः अनुभयमानः तन्द्रावापत्तिपे

983

दृष्टसंगमाद्दभिलषितार्थलाभेनोन्मत्तं किंचिदणुमात्रमपि नानुभवामि तथा च मन एवं बध्द
येन दृष्टसंगतं मनः स्वभावास्वभावांतरं पतत् श्रुतैरधिगमयितुमशक्यमिता भ्रायेनाद्याह
लोपि ४७ एककार्यनिविष्टमेकाग्रंपरं विषयांतरं ४८ ४९ सर्वविक्षेपविजिगीषुतयास्थि
तं ननु देह एव मनसः कारणं देहपीडने कुतो न पीड्यते तत्राह एतानीति एतानि पारिहृन्यमाना।

तत्रेष्टसंगमादस्मात्किंचिन्नानुभवाम्यहं अहल्याद्यपि तानाम्नामनसेद्दशिधंमनः ४७ संस
केभिर्दमायातिनस्वभावादेते परं एककार्यनिविष्टं हि मनो धारस्यमुपैति ४८ नचाल्पतेमेरु
रिपातिघातश्रुतैरपि देहोहिवरशापाभ्यामन्यत्वमिव गच्छति ४९ ननु धीरं मनो राजन्विजि
गीषुतयास्थितं एतानि चात्र मनसां न च कारणानि राजन्शरीरकाकलानि द्दश्यास्थितानि
चेतो हि कारणममीषु शरीरकेषु वारीव सर्ववनखंडलतारसेषु ५० आसंशरीरमिह विद्धि
मनो महात्मन्संकल्पितो जगति तेन शरीरसंघः आधं शरीरमभिविद्धि दृतिभि नपनगतनन्दयो
फलतिनेतरदस्यपंसः ५१॥

निपातिनां शरीरलक्षणानि शाकलानि कल्पनेकरणाः मन
सां न कारणानि किं तु चेतो मन एवामीषु शरीरकेषु कारणमित्यर्थः ५० आद्यं आमनः प्रथम

भोगायतनं भविष्यतीति अहमिस्मभिमानेनाविर्भवतीति नाधिष्ठानेन तत्र छुरीशाद्याकार फलती सर्पः ५१ उक्तमेवार्थं दृष्टांतेनोपपादयन्नाह मुखांकुरमिति ५२ अत एव देहनाशेपि पुनः पुनर्देहोत्पत्तिर्वल्लीतन्तुको यत्स्यमेव न पुनर्न भवतीति शमितुमिस्याह देहेत्ति ततच्छिन्नलक्षणं स्त्रं सर्वार्थहेतुभूतं चिन्तामणिमनुपालयपरमपुरुषार्थसमाधाने

मुखांकुरं सुनगाविद्धिमनोहि पुंसो देहास्ततः प्रविस्ताप्तरूपपल्लवाभाः नष्टेकुरे पुनरुदेतिन पल्लवश्रीनैवांकुरः क्षयमुपैति रलेक्षयेषु ५२ देहक्षते विविधदेहगणं करोति साभावना विवनवं भाजुवेतः चित्तेक्षते तु न करोति हि किंचिदेव देहस्ततः समनुपालय चित्तरत्नं ५३ दिग्ग्रीदिग्रीहरिणाक्षीमेव पश्यामि राजन्सियुवतिमनस्त्वानित्यमानंदितोसि तवपुरसहस्रीनां यस्मै दुःखदायिक्षणमथ सुचिरं तत्र लपश्यामि किंचित्तमोहोपाये दृष्टिमेव वाकं सर्गः ८०

नरक्षनत्तुच्छकोधारिवशततयाविनाशायेत्यर्थः ५३ उक्तार्थे पिंडीकृत्वा द्वयोपसंहरन्नरेंदनप्रयत्नैरफस्य माहदिग्रीहित्ति तवपुरसहस्रीनामिवकादिस्त्रीनां नामधेयं मम दुःखदायिकं शास्त्रपानादियत्नफलं दुःखं तत्रालिंचित्क्षणकालं यथ

भरतस्य मुनेः शापात्कष्टयोरपि देहयोः न मानसात्मयतानयोर्नष्टिरिति कोऽस्ति राजीवं पद्मं भिवलो
चनेयस्य १ असेंद्रस्य मुखेस्फारं मन्तुरं २ वधस्य वधाहसित्यागात्तु अवधारपित्तरेव पापेन

भानुरुवाच अथेंद्रे ऐवमुक्तो सौ राजा राजीवलोचनः मुनिं भरतनामानं पार्श्वसंस्थमुवाचह १
राजोवाच भगवन्सधर्वं र्मज्ञ पश्यामि सुदुरात्मनः न शमस्य मुखेस्फारं धार्म्मिकस्य हारिणः २ पा
पानुरूपमस्याशु शापं देहि महामुने यस्यवध्य वधात्पापं च ध्यत्यागात्त देव हि ३ इत्युक्तो राजसिं
हेन भरतो मुनिसत्तमः यथावत्संविचार्याशु पापं तस्य दुरात्मन ४ सहानया दुष्कृतिन्या भर्तद्रो
हाभिभक्तया विनाशं व्रज दुर्बुद्धि इति शापं विसृष्टवान् ५ ततस्तौ राजन् भरतोऽत्यूचतुरिदं वचः
सुदुर्मती युवायामासपितं दुष्करं तपः ६ अनेन शापदानेन किंचिद्भवति नावयोः देहेनष्टेन
नौ किंचिन्न पश्यति स्वांतरूपयोः ७ स्वांतं हि केनापि शक्यते नाशितुं क्वचित् सूक्ष्मत्वाच्चिन्मय
त्वाच्च दुर्लक्ष्यत्वाच्चविद्धि नौ ८॥
वर्तीति धर्मशास्त्रे प्रसिद्धमिसर्थः ३ ४ अनयाऽहल्यया सहविनाशं प्रस्तु ५ राजभर
तौ प्रतिदं वचनमूचतुः ६ नौ आवयोः किंचिदपि न नश्यति तत्र हेतुः स्वांतरूपयोरिति ७
नाशितुं नशयितुं सेटि णिलोपः छांदसः परैर्दुर्लक्ष्यत्वाच्च ॥ ८ ॥ श्रीरामसमर्थराम हरे ॥

986

पतितौ मत्ता विज्ञियावृत् ९ व्यसनेन दृढं विषयरागेण संसक्तौ बद्धौ १० अथ बहुजन्मपरंप
रानंतरमस्मात् सर्गेऽस्मदीये ब्रह्मांडे ११ भारतो भरतेन दत्तः शापस्तयोः शरीरमात्रेसाक्षे

भानुरू वा० सुधनस्तेहसंवद्धमनस्कावेव शापतः पतितौ भूतले दृष्टविघुत्ताविवपल्लवौ ९
अथव्यसनसंसक्तौ मृगयोनिमुपागतौ ततो द्वावपि संसक्तौ भूयो जातौ विहंगमौ १० अथोस्मा
कं विभो सर्गे भियस्संबंधभावनौ तपःपरौ महापुण्यौ महापुण्ये जातौ ब्राह्मणदंपती ११ भा
रतोपित्रयोः शापः ससमर्थो बिभ्रवहच्छरीरमात्रेण क्रमणेन मनोनिग्रहेऽसमो १२ तावद्यापि
तेनैव मोहसंस्कारहेलना मन्त्रयन्त्रप्रजायेते भवतस्तत्र दंपती १३ अहो जन्मप्रेमरसानु
विद्धं स्नेहेन तयोस्तत्प्रति वीक्ष्य कांतं वृक्षा अपि प्रेमरसानुविद्धाः शृंगारचेष्टाकुलिता भवंति
१४ मोक्षोपायेषु त्रिमेंद्राहल्यानुरागस्सर्गः ९०

लोढुमितिवाक्क्रमणेना नो समर्थो बिभ्रवानतः
मनोनिग्रहेऽसमर्थः १२ १३ वृक्षा अपि शृंगारचेष्टाकुलिता भवंति किं पुनरन्ये इत्यत्ति
शयोक्तिः १४ ॥ इति श्री वासिष्ठता० उत्प० नवतितमः सर्गः ॥ ९ ॥ श्रीरामसमर्थ राम·

इह भानुं मनुं कृत्वा धातुः सर्गो निरूप्यते मनोमात्रविलासत्वं विश्वस्यैंदवसर्गवत् तेन भार
तः शापो मनोनिग्रहेन समर्थो बिम्बेत्युक्तेन हेतुना १ अतो हेतोरैंदवानां सृष्टिक्रमाणां प्रवि
नाशनं त्वया कर्त्तुं न युज्यते तेन पायति महात्मनस्तव त्वयुक्तं उचितं च न भवतीत्यर्थः २ नहि

भानुरुवाच तेनैतद्वच्मि भगवन्यथाकालं मनो मुने अनिग्राह्यमभेद्यं च शापैरपि दुरासदैः १
ऐंदवानामतः सृष्टिक्रमाणां प्रविनाशनं युज्यते न च तच्च त्वन्युक्तमेतन्महात्मनः २ किं तद
स्ति जगत्यस्मिन्विधेयं युजगत्स्यं च तवापि नाथ नाथस्य यत्नेनाप्य महात्मनः ३ मनो हि ज
गतां कर्तृ मनो हि पुरुषः स्मृतः यन्मनो निश्चयकृतं तत् द्रव्यौषधिदंडनैः ४ हन्तुं न शक्यते जं
तोः प्रतिबिंबमणेरिव तस्मादेते त्वतिष्ठन्तु भासुरैः सर्गसंभ्रमैः ५ त्वं संप्रेक्ष्य सदा तिष्ठ चूर्णा
काशो घनं तत्कः चित्ताकाशः चिदाकाशो आकाशश्च तृतीयकः ६ अनंतास्त्वय एवैतौ चिदाका
शं कान्तिता एकं द्वौ नान्त्र हत्वापि कुरु सर्गान्दिगन्तरे ७॥

ऐंदवाभाममसर्गः स्यादित्तिरैन्द्र
मालया ह किं तदिति ३ ४ एते ऐंदवाः ५ हन्ताहमिति सर्गस्या चकाशस्तत्राह त्वभानिरूकृत्व

चित्ताकाशेऽनंतं चेमन इति ज्ञातिरिति भावः अथ मत्त्रिदाकाशः चिदाभासाकाशः ६ सा
क्षिकूटस्थचिदाकाशप्रकाशिताः चित्ताकाशेऽनंतकोटिब्रह्माण्डानामप्यवकाशोऽस्ति किं
पुनरेकस्येत्याशयेनाह एकमिति ७ ८ अंबरं साधुक्तमाकाशचतुष्टयमपि ९ तन्मध्ययोरे

स्वेच्छयात्मनि तिष्ठ त्वं किं गृहीतं तत्त्वैं दवैः अन्योवा अथैरवजगज्जालेनानुनेव मुदाहृते ८ म
यासंचिंतस सुचिरं मेदमुक्तं महामुने मुक्तमुक्तं च यानानोवितत्तं हि किलांबरं ९ मया त्वचि
त्तं वापि चिदाकाशश्चविस्तृतः तद्यथाभिमतं सर्गं निस्सकर्म करोम्यहं १० करप्यामि बहूना
मुभूतजालानि भास्कर तलमेवाम्भुभगवन्प्रथमो मे मनुर्भव ११ कुरु सर्गं यथाकामं मयास
मभिचोदितः अथैतत्समहातेजा मम वाक्यं प्रभाकरः १२ अंगीकृत्य द्विधात्मानं चकार तपतां
वरः एकेन स्वात्मनेनास्मिन्वपुषास्सर्गतां गतः १३ व्योमाध्वगतया सार्धं तनान्दिवसाबलिं म
मानुलंघितो येन स्वलोकवपुषाधुना १४ ॥

वसर्गाधारत्वात् मुख्येत्याशयेनाह मनस्त्वं त्वेति चि
दाकाशो मनोवच्छिन्नः भूताकाशस्य स्वांतःपातात्र तत्साकाशस्यासंगतत्यास गसिनाधारत्वादि
ति १० तत्तस्मिन्सर्गेऽपि प्रथमो मनुः स्वयंभुवः ११ समभिचोदितः आज्ञप्तः सन् १२ तपतां वरेति

१५ उपसंहरत्तिएतद्दित्तिमह्यमौनोमनसः १६ सफलतांनोगव्यवहारस्ययोजकतामपि १५

ससर्जसंकल्पात्सृष्टिंतांतामभिमतांमम १५ एतत्तेकथितंसर्वंचास्यमनसोमुने स्वरूपंसर्वशै
लंचशक्तत्वंचमहात्मनः १६ प्रतिभासमुपायाद्यद्रसाहिचेतसः तत्तत्साकारतामेतिस्थैर्यंसफ
लतामपि १७ सामान्यब्रह्मणोनत्वात्प्रतिभाचशाश्वकिल ऐंदवाब्रह्मतांयातमनसः पद्मश्रा
कतां १८ यथाचैंदवजीवास्तेचित्तत्वाद्ब्रह्मतांगताः त्वयंतथैवचिन्मात्रत्वात्ब्रह्मतांगता १९
चितोहिप्रतिभासात्मयच्चतत्प्रतिभासनं नतदिदंभातिदेहादिसंतानंनान्यास्तिदेहहृत् २० ॥ श्री

१८ स्वस्यापिहिरण्यगर्भताऐंदवब्राह्मणस्येवसाहमयेति चिन्मात्रत्वात्प्रकल्पंसंप्राप्तचित्तत्वाद्ब्रह्म
तांहिरण्यगर्भतां १९ नदेवसंतानंमनएवास्तिदेहहृदहंदेहस्ततस्तत्प्रतिष्ठितादन्यानास्ति २० ॥ छ॥

आत्मनि स्वस्मिंश्चमत्कारः कल्पना यस्मात्तथाविधं भवति आत्मचमत्कारं चिद्रूपोऽतितत्त्वत
त्कुरुते इति तादृशं सर्वेषां मनसः स्वं कुर्वानं कल्पयतीति आह यथा चेत्संभवतीति यथा वल्कामा
कर्मवासनानुसारेण वा चेद्घटः संभवतीति दृष्टांतं च देवेति सर्गः यथा मरिचं कटुत्वं यैवांतः परिणाम
तेनिं बलत्ति कत्तमाद्राक्षामधुरत्वं येतिस्वस्वसंस्कारादेवास्थितं तद्वदित्यर्थः २१ अत एव देवो

चित्तमात्मचमत्कारं तत्तत्कुरुते स्वतः यथा वस्तुं भवं स्वात्मन्येवांत मरिचादिवत्तु २१ तदेत
च्चित्तचमत्कारमात्तिवाहिकनामकं तदेवोदाहरंस्ते वदेहनाम्ना घनभ्रमं २२ कथ्यते जीवनाम्नै
तच्चित्तमत्तनुवासनं भ्रांतदेहचमत्कारं जीवं विद्धि कमात्मपरं २३॥ श्रीरामजयरामहरे॥

हमनुष्योहमित्यादिदेहनाम्ना प्रतिनियतं जनाउदाहरंतीति कं रूपमित्याह तदेतदिति चित्तचमत्का
रं आतिवाहिकनामकं स्वस्य देहमेव घनभ्रमं स्थौल्यभ्रांतिमुक्तं तं देहनाम्ना उदाहरंति २२
यदि चित्तं देहस्तर्हि इदमेव जीव इति कथं प्रागुक्तं आह कथ्यते इति अनुवासनं जीवः प
नर्मं तु देहस्य सुखेते इति भेदः क्रमात् भ्रांतदेहत्रयचमत्कारं तत्परब्रह्मविद्धीत्यर्थः २३॥

एवंचतंतुभिः पटस्वनकस्यापि देहोनामपर्ययस्तोसाहनाहमित्ति २४ तत्त्वस्तत्सर्गांतरमित्यपि
मस्थितकल्प नैवेत्सहमेवतत्रपीत्साहं तत्त्वतमिति २५ स्वभावः परमात्मैव सत्त्वस्त्रिपंचभस्म
तरादात्मखात्पृथगिवदेहादिभानभाती समर्थः २६ धोत्तनिपातोनजर्थे २७ चिद्वपुः पर

गाहंनचात्मरस्तीहचित्रैंचित्तमिदंसंस्थितं वासिष्ठे॥ एवसंविदृदससत्ताभिवागतं २४ यथैं
दवमनोब्रह्मात्थैवायमहंस्थितः तत्त्वतंचाहमेवेदंसंकल्पात्सैवभासते २५ कश्चिच्चित्तवि
लासोयंब्रह्माहमिहसंस्थितः स्वभावएवदेहादिविभ्रमस्तन्मत्तरात्मत्वात् २६ मुद्धाचित्त
रमायैकरूपिणीसेवभावनात् जीवोनयोमनोनलावेत्ती स्वं देहतामुधा २७ सर्वमिदंवसं
सारवदिदंभातिचिद्वपुः संपन्नासंसबोधात्मास्वमोदीर्घः स्वशक्तिजः २८ दृश्यं दृश्यं विल
माकारंतन्मात्राभासपूर्वकं हेदंवांपरवद्रूपंचित्तादेवाखिलंभवेत्॥२९॥ श्रीरामसमर्थ॥

मात्मैवऐंदवसंसारवत्सर्वात्माभाति यथास्वाज्ञानशक्तिजः स्वप्नः दीर्घः सन्संपन्नजाग्रदा
त्माभातितद्वदित्यर्थः २८ यतः सत्संस्कारवासनामयंशब्दतन्मात्राध्यासपूर्वकं भवतिज
गत्ततऐंदवचित्ताकाशवदेवरूपमित्तिसंभाव्यतइत्यर्थः॥ २९ ॥श्रीरामसमर्थ॥

यथोदासीनचित्तादेव सर्वं स्फुरति तर्हि कथं देहादिष्वहंत्वाभिमानादनुदासीनरूपं भातीति तत्रा
हन सदिति यदहंरूपमभिनिवेशरूपमनुदासीनस्वभावमनुभूयते तन्न सत् सर्वत्र चित्त
कार्येष्वदर्शनात् नाप्यसत् जगत् उपलंभादर्शनात् अतः सत्ताचेत्त देव सत्तासदेकरूपत्वा
त्सदेव जगत्सत्ता चासदेकरूपत्वादसदेव जगदहंरूपं तु नैकस्वभावमिति यतः क्वचिदुपलंभेन हे

न सत्त्वासदहंरूपं सत्तासत्ते तदेव च उपलंभेन सद्रूपमसत्तं तद्विरोधतः ३० जडाजडं मनो
विद्धि संकल्पात्म दृढहद्वपुः अजडं ब्रह्मरूपत्वाज्जडं दृश्यात्मतावशात् ३१ दृश्यानुभवस
त्वात्मनस्सद्यो विलासितत् कटकत्वं यथा हेम्नि तथा ब्रह्मणि संस्थितं ३२ श्रीरामः

तुनासद्रूपा भवति क्वचित्तद्विरोधतोऽनुपलंभादसत्त्वमसद्रूपमिति विरुद्धस्वभावं भासत इ
ति मायिकमित्यर्थः ३० एवं मनसो जडाजडविरुद्धस्वभावात्मत्वादपि मायिकत्वमित्याह जडा
जडमिति ३१ तस्य कदाचिद्दृश्यात्मता कदाचिद्ब्रह्मरूपत्वं तत्राह दृश्येति तन्मनो दृश्यानु
भवकाले दृश्यमिव सत्त्वात्मसम्पत्तेर्ब्रह्मानुभवेन विलासिन पृथग्विलसेन शीलमिति ब्र
ह्मैव यथा हेम्नि कटकत्वं कराले कृतिकार्यदृश्यासेर्ष्यः पृथक्सविकदृशात्तदेव तद्वत्सं
स्थितमित्यर्थः ३२

तवजगतोपिजडाजडविरुद्धस्वभावत्वात्मायिकत्वमेवेत्याशयेनाह सर्वत्वादिति अस्मा
दादिशिलांताब्रह्मादिस्थावरांतात्मतायौक्तिकदृशाविरुद्धस्वभावमपिपरमार्थदृशा
नजाड्यचैतन्यधर्मकमित्यर्थः ३३ जडंचेतनमितिचव्यवस्थाअनुपलंभोत्तरं वा स्यात्
आद्यउपलंभस्यैवासंभवात्सत्तैवनास्तीत्याह त्वेजडाजडत्वाचितेत्याशयेनाह दार्वादीना

सर्वत्वाद्ब्रह्मणः सर्वंजडंचिन्मयमेवच अस्मदादिशिलांतात्मनजडंनचचेतनं ३३ दार्वा
दीनामचित्वेननोपलंभस्यसंभवः उपलंभोहि सदृशसंबंधादेवजायते ३४ उपलब्धेज
डंविद्धितेनेदंसर्वमिवाहि उपलंभोहिसदृशसंबंधात्स्यात्समात्मनोः ३५ ॥ श्रीरामजयराम

मिति सदृशयोः समात्मसमेयचिद्रावोर्व्यक्तिद्वयकार्यैक्यसंबंधाद्धि उपलंभः प्रसिद्धः जडैक
रूपत्वाद्वार्वादेर्नत्समेयचैतन्यमस्तीतिनोपलंभसंभवइत्यर्थः ३७ द्वितीयेप्याह उपलब्धे
रिति अजडंविद्धीतिछेदः उपलब्धिप्रमेयस्योपलंभेंतर्भावात्तद्विषयस्याजडैकस्वभावता
परिशिष्यतेयतः प्रागुक्तचितादैक्यलक्षणसंबंधादेवोपलंभोजायतेतत्तथाचानुलब्धे
उपलब्धेचजडत्वचेतनत्वेविपर्यदुर्घटमित्यर्थः ३५ ॥ ॥ ॥ ॥

994

उभय दुर्घटत्वेनच स्फलितं तदाह जडेति ३६ तस्माच्चित्तत्वे साकारकैवल्यनैव मनस्तान्ताहि
वेकएवांनिर्मनस्कत्वे साश्रयेनाह चित्तदर्शादिना ३७ तन्नचिदात्मभोगविस्मरणेन जडा।

जडश्चेत्तत्तभावादिदाबार्य आनीविद्यते अनिर्देश्यपदेय तत्त्वनादीवमहामतो ३८ चि
तोऽपश्च स्फुरणं तन्मनस्समुदाहृतं चिद्भागो आजडो भागो जाड्यमात्राहि चेतसा ३९ चि
द्भागो भावबोधांशोजडं चेतं हि दृश्यते इति जीवो जगद्भ्रान्तिं पश्यनाछ्वति लोलता ४०
चित्तस्य एव भावो सो भुवि एव द्विधा हृतः अतः सर्वं जगत्सैव दैतत्वं च सैव तत्त्व ४१
स्वमेवान्यतया दृष्ट्वा चिति दर्शपत्याव पुः निर्भागापि च भोगाभं तन्मती वन्मात्रमानुरा
४० नन्वेति एस्तित्रमभाद्भानेवेती हृनिष्क्रयः परिपूर्णापि विभक्ता वेती ख्यं संस्थिताचि
ति ४१॥ ४

स्वजीवजगद्भ्रमः संपन्न इत्याह इति जीव इति ४८ स्फुरणो भावचित्तस्य एव चित्तं जगादि
ति द्विधा हृतः अतश्चिरेक बुद्धोपलब्धं सर्वं जगत्साक्षिरेव दैत्त बुद्ध्यालब्धमतस्सैवैस
र्वः ४९ निर्भागानि विभागा एक भोगा भंस्व गतविभागानुलंब ५० आमभावूना पुरुषानैव
४१॥

असाम्प्रितेः सर्वरूपं जाड्यमपि चित्तिरेवस्यात् यतस्तस्मिन्जाड्ये चितंच चेन्निज चिदेकत्व
भावत्वे स्फुरणायोगाद स्फुरणे जाड्यसाप्यसिद्धेरित्यर्थः यथा जडे व बोधोस्ति एवं चेतनेऽज
डभागोप्यस्तीति दर्शयितिअहंतेति ४२ कथमहंतायाजडत्वमिति चेद्गलयाहतत्वादि

सर्वस्याज्जाड्यमप्यस्याम्प्रितिम्प्रित्वंच नेसितत् स्वभागोंशोऽवबोधस्यत्वहंताजडतोस्य:
४२ अहंतादिपरेतत्वेमनागपिनयते ऊर्ध्वदिव्यपथनको येसंविस्तारहितधृतः ४३ अहं
मत्यपसंदर्शं चेत्संविद्धिसमुत्थितं मगतघ्नो चिवृत्तस्वंतनंविघ्नतएवतो ४४ अहंता
पदमंतात्मपदं विद्धि निराममं विदंविदुरहंतादि शेस्यमेवयथाहिमं ४५ चितैवचैत्य
तैजोऽयं स्वमेस्वमरणेगपम सर्वात्मित्वा त्सर्वशक्ताः कुर्वत्तीनेतिसाम्यता ॥ ४६ ॥ श्री ॥

साहअहंतारीति संविस्तारं चिदेकत्वं ४३ अतएवतस्यासत्वमपीत्याहअहंमत्ययोति
४४ अंतात्मपदंसर्वदिनबाधावगताधामेवस्तु अहंतापापरंजनात्मयं विद्धि दंचित्स्व
भावमेववासनयाघनीभूतमहंतादिरूपं जनाविदुः पश्यंति यथा शैत्यमेव घनी भावा
द्धिमंपश्यंतितद्वदित्यर्थः ४५ सर्वशक्ताः कुर्वत्ती आविष्कुर्वाणा चित्तंविनाज्ञानदार्ह्य

नानात्मकश्चित्तलक्षणो देहोऽतिवाहिकः ४७ कथमिदं बोद्धुं शक्यं तत्रोपायमाह देहादीति स्थूलदेहादिदेहत्रयप्रतिभासरूपात्मतां च स्वजनतासत्ताऽधिकारिणा चित्तेनैव चित्तं प्रतिभासात्मप्रातिभासिकं विचार्यमित्यर्थः ४८ किंतद्विचारेण

उत्प

मनःप्रभृत्यादि तथा सर्वरूपं विजृंभते नानात्मचित्तदेहोऽयमाकाशविशदाकृतिः ४७ देहादेहप्रतिभासरूपात्म्यं स्वजनतासत्ता विचार्य प्रतिभासात्मचित्तं चित्तेन वेद्यं ४८ चित्तमात्रे शोधिते हि परमार्थस्वरूपतां गते ऽच्छात्मिमज्जानंदः किं देहोपलंभकैः ४९ यदि घृते शोधिते तद्बोधः केवलस्वपादपाः देहाद्यचिद्याससाक्षिके कृपणतां प्रतिग्रहः ५०॥

५००

सत्ये शोधे कृते चित्तं भवति तदा हि चित्तेति अच्छात्मिमोनित्यनिरतिशयमज्जानंदः प्राप्यत इति शेषः तर्हि देहादयोपि शोधं तां ततोपि पुरुषार्थः किं न लभ्यते तत्राह किमिति वृथा शोधाद्यर्थः ४९ किंचासत्वादपि देहादेर्न शोधनार्हत्वमित्याह यदीति तद्बोधः फलवानिति शेषः स्वकल्पिताः पादपाः के शोध्यमाना दृष्टा इत्यर्थः एतां अविद्यां प्रतिग्रहः शोधनाय महोत्सुक चित्तः स्यादित्यर्थः ५०॥

अत एव स्वात्मादिशब्दे देहेस्थ पुरुषत्वमपि कृतौ न देहवाचिनः कृतेरसत्तार्थनिष्ठत्वायोगात्त्वयेगा
त्वसत्त्वविनिविष्टा देहात्मदृष्टिनिश्चया चार्वाकपामराद्यो देहवाचिन एवात्मादिशब्दा इति
मन्यते तेषां ये किंचिदपि आत्मादिकं वस्तु परिशंसन्ति तेऽज्ञा पुरुषपेडकाः पुंसशावएव ते

असत्त्वविनिविष्टानां देहावाचित्तयात्विह येनात्मोपदिश्यं संज्ञाः किंचित्ते पुरुषपेडकाः ५१ य
थैतच्छ्रावयेत्स्वात्तं तथैव भवति क्षणात् दृष्टांतोऽत्रेदं वाहत्याहत्रिमंत्रादिनिश्चयः ५२ य
था यथा स्फुरति स्मृतिभास्वचित्तं तत्तत्तथा भवति देहतयोदितात्म देहेयमस्मि न न चाह
मिति स्वरूपं विज्ञानमेकमवगम्य तिष्ठ साक्ष ५३

आत्मादिसत्त्ववस्तुनिष्ठशब्दानां दे
हाद्यसत्त्ववाचित्त्वाविपरीतबुद्धीनां मतिसत्तार्थबोधनाशक्तेरित्यर्थः ५१ कथं तर्हि म
रसा चित्तसमस्तदेहभावः संपन्न इति चेच्छ्रावणयेवेत्स्मारयेनाहयथेतदिति ५२ उक्त
मेवार्थं स्फुटं वदन्नुपसंहरति यथा यथेति अयं देहो न अस्मि अहमिति च सिद्धो हंकारस्त्वना
स्ति अत एव एकरसं विज्ञानस्वरूपमात्मानं अवगम्य निश्चित्य यथा साक्षितया अवतिष्ठेत्यर्थः ५३ ॥

देहो मानुषादिरूपं तत्पक्षे एव देहभोगः प्रपंचः अयं इति स्वभावात् स्वकल्पनावशात् अयमात्मा
देह एव भवति एवं तदखिलो भोगप्रपंचो भवति एतदाखिलं भोगप्रपंचो भवति तस्मात् स्वभावाद् देहनाशम
नु नाशं एति मिथ्याऽयं बालः कयापि युक्त्या निर्यस्य देहगत एव सन्न पियस्ततो दोषण स्वगसि

देहोयमेष च किलायमिति स्वभावाद्देहो मे तदखिलं एततत् एति नाशं यस्मादिकल्पनवशात् अस्य
मेति वालो निर्यस्य देहगत एव कयापि युक्त्या ५४ मोक्षोपाये जीवाचतरए क्रमोपदेशः स
र्गः ९७ श्रीवसिष्ठ उ० इत्युक्तवान् स भगवान् भयाकमलसंभवः रघूद्वह पुनः पृष्टो वाक्यमास्थि
प्य नतपः १ त्वयैव भगवन्प्रोक्तः शापमंत्रादिशक्तयः अमोघा इति ताएव कथं मोघाः कृ
ताः पुनः २॥

तत्वादिकल्पनवशाद्यथा हेमयस्तोयसो देहगतः स्वभावो भवति तद्वदितरार्थः ५४ इति श्रीवा
सिष्ठतात्पर्यप्र० उत्पत्तिप्र० एकोनवतितमः सर्गः ९७ इहासिषमनः शक्तिरमोघास्त्वाप
ते इदु दालेषिपुरुषयत्नस्य यथेष्टारोपणक्षमा प्राक्तं तं वाक्यं अनुपपस्तुत्वात् वनेनासिष्पपु
नर्मयापृष्टः १ आक्षेपप्रकारमेव दर्शयति त्वयैवेति अतस्त्वद् उक्तिविरुद्धे सधेः २॥

५

एवं लोकदृष्टविरोधोऽपि स्वाह शापेनेति तथा च नहुषस्य शापादजगरत्वं प्राप्तस्य मनोमोहात्स्व
वंशजस्य भीमसेनस्य ग्रसने प्रवृत्तिः तथैव धार्मिकस्यापि सौदासस्य शापाद्राक्षसतां गतस्य बुद्धि
मोहात् ब्रह्मवधादौ प्रवृत्तिः गंधर्वराजस्य च शापाद्वृत्रासुरजन्मनि च सुरेंद्रियनाशः एवम

शापेन मंत्रवीर्येण मनोबुद्धीन्द्रियाण्यपि सर्वाण्येन विमूढानि दृष्टानि किल जंतुषु ३ यथै
तौ पवनस्पंदौ यथाऽऽलोकतमसी यथा अभिन्नौ तद्वदेवैतौ मनोदेहौ स एव तत् ४ अथ नास्ति
ह वा देहः केवलं चेतसैनसः क्षुधानुभवति स्वममगात्तथा द्विवं द्रवत् ॥५॥ श्रीरामसमर्थ

अत्रापि दृष्टं दृष्टांतमर्थः ३ एवं कार्यविरोधोपपत्तौ साम्ययेनाह यथेत्यादिना तत्रापि यथान्योन्याश्रो
वन्योऽल्पादिदृष्टांतांतरसंग्रहार्थः कार्यकारणयोर्भेदनिरूपणात् तथा च मनसा वरस्य
पाधनाक्रमेण तदभिन्ने देहेऽपि तदनाक्रमणं स्यादित्याशयः ४ ननु देहस्य मनोऽन्यूनसत्ता
कत्वाद्देवशापाद्याक्रमणेऽपि न मनसस्तत्प्रसक्तिरिति विवक्षयाऽऽदेनपरिहारमाशंकते अ
थेति ५ ॥

तत्राधिदेवांतरमाहैकनाशेद्वितिएकनाशेद्वयोर्नाशोभवितुमवश्यमुपपद्यतेयथामनोना
शेदेहपरिक्षयोदृष्टएवदेनाशेमनःपरिक्षयोपिसंभावितइतिनदेहस्यमनोन्यूनसत्ताकत्वात्किं
तुसमसत्ताकत्वामस्तुत्तचक्षुराद्यगम्यत्वेसत्यपरोक्षविषयत्वात्खमारिवन्मनसएवदेहन्यून

एकनाशेद्वयोरेवनाशेत्राशुपपद्यते अवश्यंभवत्तुमनोनाशेदेहपरिक्षयः ६ मनःशाखा
रिभिर्दोषैःकथंनाक्रम्यतेप्रभो कथमाक्रम्यते वापिब्रूहिमेपरमेश्वर ७ ब्रह्मोवाच नतदस्ति
जगत्कोशेशुभकर्मानुपातिना यत्पौरुषेणशुद्धेननसमासाद्यतेजनैः ८ आब्रह्मस्थावरांतंच
सर्वदासर्वजातयःसर्वएवजगत्यस्मिन्द्विशरीराःशरीरिणः ९॥

सात्ताकत्वेत्तिरज्जुनाशेस
मर्पस्येवदेहनाशेनमनोपस्थानसंभवइतिभावः ६ ७ तत्रप्रथमंविरोधंपरिहर्तुंवर
शापप्रावल्पोक्तेरौत्सर्गिकत्वंबहुतरदृष्टानुसारादवश्यमभ्युपेयमितुपयारम्भितुंवरशाप
योरप्युपजीव्यकर्मोत्थोदलितपौरुषप्राबल्यंतावत्स्मारयतिनतदस्तीति ८ स्थूलस्येवोपधा
तोदृष्टेनसूक्ष्मस्येतिलोकदृष्टानुसारंस्वोक्तैर्वक्तुंभिन्नस्वभावोद्वौदेहौदर्शयतिआब्रह्मेत्यादि
ना॥९॥

१० विद्याभिचारहस्तादयः आदिपदाच्छस्त्रविषादयोगृह्यंते तेषां संचयैः समूहैः ११ ईर्षादि
स्यादिपदाद्द्रोहापिशुनादिसंग्रहः १२ आपतः स्वाधीनः नायत्तोऽस्वाधीनः १३ तत्रस्वाधीनतांहेतु

एवं मनः शरीरं तु सिद्धक्षाधिसदासबलं अकिंचित्करमस्मत्तु शरीरं मांसनिर्मितं १० तत्र मांस
मयः कायः सर्वस्यैव च संगतः सर्वैराक्रमते न स्यापेत्तथा विद्यादिसंचयैः ११ मकृन्मायोद्दश
कोसौदीनः क्षणविनश्वरः पद्मपत्रांबुचपलो दैवादिविवशास्थितिः १२ मनो नाम द्वितीयो
यं कायः कायवतामिह सआयत्तोपिनायत्तो भक्तानां भुवनत्रये १३ पौरुषं स्वमवष्टभ्य धैर्यमा
लंब्य शाश्वतं यदितिष्ठत्सगम्भीरो दुःखानां तदनिर्दितः १४ यथा यथासौ यतते मनो देहा
दिनां तथा तथासौ भवति स्वानिश्चयफलैकभाक् १५ सफलो मांसदेहस्य न कश्चिसोरुषक्र
मः मनोदेहस्य सफलं सर्वमेव स्वचेष्टितं १६ पवित्रमनुसंधानं चेतः स्मरति सर्वदा निष्फ
लास्तस्य शापाद्याः शिलायामिव सायकाः १७

कोपापपारमपत्ति पौरुषमिति अगम्योऽनाक्र
मणीयः तैर्दुःखहेतुभिरनिंदित अदूषितः १४ दुःखानुपघातस्वसुखोपचयोपपत्सवर्द्धनं
इत्साहस्यधेत्ति १५ स्थूलदेहस्य तु नायं क्रमदुत्साहस्य फलदूति १६ विषयदोषैर्हि मनोदु

भेत्रान्मरोषेणेत्याशयेनाह पवित्रमिति यथा चन लोकदृष्टिविरोधशंकावसर इति भावः १७
कार्यविरोधमपि परिहरति पृतस्त्विति १८ सर्वेषां देहादिभावानामुपदर्शनेपि रूपातिशयः अम
लः सर्वः समृद्धः अनन्येविघ्नेन फलं ददातीति तप इत्यादि तिसृभिः एवमनसः फलं ददाति पौरुष

पत्तरूभासिवृत्तौ वाकर्मैनाशरीरकं मनोपरनुसंधत्तेन देवामोतीति तस्मात् १८ पुरुषा
तिशयः सर्वः सर्वभावोपि मर्दन इदासविघ्नेन फलं मनो हि मनसो मुने १९ पौरुषेणाबले
नांतर्भ्रान्तं हत्वा प्रियमस्यं हृत्त्रिभेदेन दुःखात्तिर्निर्दिष्टा सामनागमि २० पौरुषेणमनः ह
त्वानी शगां विगतज्वरं मांडव्येणजित्ताः कौशिकः सुलभांतेपि तिष्ठता २१ अथकूपस्थितेनापि
मानसैर्यज्ञसंचयैः ऋषिणा दीर्घतपसा संप्राप्तं वै बुधं परं ॥ २२ ॥ छ ॥ ॥

सापि मनोभेदत्वादित्यर्थः १९ यन्त्र विषये दोषेपि मनो दान्तैर्दुःखादर्शनं तत्रै पवित्रैविषयैः किं
वाच्यमित्याशयेनेदं पाख्यानादि स्मारयति पौरुषेणेति मांडव्यस्य कथा महाभारतारंभादौ
प्रसिद्धा २२ दीर्घतपा अपि पुत्रकाम योगोपकरणार्जनाय निर्गतो देवादंधकूपे निपतित
स्तत्र याग कालातिक्रमे प्रसक्तेमनसैवैतेनेष्टः प्रसन्नास्तं कूपादुद्धृतस्स परं निनायेति भा

२३ अनुसंधानमुपासनं वा २४ पापदृशोरक्षः पिशाचाद्यः तच्चित्तं ध्यानार्थेकाग्रचित्तेन खंडयंति न परिभवंति पश्चेन घातास्ताडनानि २५ येसोढासन हृषविश्वामित्राद्यः आदि पद्राका

दुपुत्रै नरैरेव पुरुषाध्यवसायतः ध्यानेन ब्रह्मलग्नाशा सामयापि न खंड्यते २२ अन्येपि सावधाना ये धीरास्सुर महर्षयः चित्तात्तमनुसंधानं न त्यजंति मनागपि २४ आधयो व्याधयश्चैव शापाः पापदृशस्तथा न खंडयंति तच्चित्तं पश्चघाताः शिलाभिव २५ ये चापि खंडिताः केचिद्ध्याध्येयाध्यवसायकैः स्वविवेकास्समंततेषां मनोमन्ये विपौरुषं २६ न कश्चन संसारे सावधानमनाः क्व समेपि कांश्चिद्दृश्ये वा दोषजाले खिलीकृताः २७ मनसैव मनस्तस्मात्पौरुषेण पुमानिह स्वकमेव स्वकेनैव योजयेत्पावने पथि २८

मर्कोऽध्याभिमानादिसंग्रहः तेषां मनो विपौरुषमदृष्टपौरुषमित्युपासनायां स्वविवेकास्समर्मितिज्ञाने चासमर्थमितित्तर्कयामीत्यर्थः २६ विवेकपौरुषदृष्टेतु मनसि नाभिलषितसत्तिरित्साहकृद्दन्विरिति दृश्योपाजाग्रत्तिवा

२७ ॥ २८ ॥ ॥ ॥ ॥

1004

दूषित्प्रतिभातमपि मनसि स्थिरनिरूढं पानं सत्यं यथाभूतं स सम्भवोपभोगसमं भवतीत्यर्थः २९
ननु पूर्वतनमनुष्यादिभावप्रतिभासदानादिं वा देहस्तास्थितिरपि कुतो नान्यत्तत्राह प्रतिभास
स्येति उत्तरदल वासनया पूर्ववासनोपमर्द इति भावः ३० पूर्ववासनोपमर्दनोपलक्षणस्यो
पासनस्य कथं कार्यान्तरसमतां तत्राह प्रतिभासेति विरोधिभंजनपर्यन्तमेव सकार्ये विलंब

प्रतिभातं यदेवास्य यथाभूतं भवत्यलं क्षणादेव मनः पीनं बालवेतालवन्मुने २९ प्रतिभा
सस्यानुपदं प्रारब्धेनो स्थितिमुह्यति कुलालकर्मानुपदं घटो मृत्पिंडतामिव ३० प्रतिभासार्थ
तामेति क्षणादेव मनो मुने संरम्भात्मकं वारि यथावर्तगततरंगतां ३१ अनुसंधानमात्रेण
स्वबिंबे पियाभिनी मनः पद्मरागस्य भुक्ताः स्वच्छ द्रविबेष्टितामिव ३२ ॥ ५ ॥

५

तदुत्तरं तु क्षणादेव निष्पन्न इत्यादौ पासनिकप्रतिभासगोचरोपासार्थतां एति स्यात् भोत्स्येवेति
नोपलक्षय इति भावः ३१ ननु तथापि प्रलयकालिक मूर्तद्विरूढसर्गकल्पनं तेषां तत्राह अ
संधानमात्रेणेति नान्तरीयसर्गे स्थिरीयसर्गस्थं किंचिदनु कूलं वा तत्र नान्तरीयानुसंधानमा
त्रसापेक्षणादिन प्रलयकालेपि तद्विरोध इति भावः अयुक्ता सांगुल्य वष्टब्ध दृष्टिः ३२ ॥

1005

सदृत्वचनात्रैस्तत्त्वमपिमनसएवेस्याहमदिति तदेवतत्त्वमस्तत्तिदेवमोक्तद्दूतसर्यः ३३ भ
मर्थमुदाहरणेन दर्शयति प्रतिभे तिप्रतिभाअनुसंधानं भोजका दृष्टोद्बोधितसंस्कारस्तदनुप
रंतदनुसारितया चाविराहेणं प्रसिद्धमित्यर्थः ३४ स्वाद्वभावैक्षीरदूतिपाठेजले रसायनंम

मसस्पातितदेवाशुफलाभक्तमिदंमनः सहहर्षविषादाभ्यांभुंक्तेतस्मात्तदेवतत्त्व ३३ प्रतिभानु
परंचेतरुमद्रेष्याग्निशिखाशतं दृष्ट्वादाहमवाप्नोतिदुःखंच परितप्यते ३४ प्रतिभानुपरंचे
तःक्षीरेपिहिरसायनं दृष्ट्वापालापरांतसिंयातिवलाग्निन्स्तत्ति ३५ प्रतिभानुपरंचेतोमो
मन्यपिमहावनं दृष्ट्वालुनातिलूतान्पुनरारोपयस्तलं ३६ दूसंयदैवपरिकल्पयंतीज्ञा
लंक्षिमंतवपरिपश्यतितावचेतः नासङ्गागन्मवसदिस्तवगमनंतंलूनांदशांविविधभेदवं
तीजहाति ३७ मोक्षोपायेषु० प्रा०मनोमाहात्म्यवर्णनंसर्गः २२

धुरादिरसभेदान्तथाचोष्ट्र
च्छगारस्योक्तिनिंवादिपलक्षिपिमधुरीकृत्तभक्षयंतीतिद्रस्पतद्दूतिभावः ३५ ३६ उक्त
मुपसंहरतिदूस्यामतिलूनांपरिछिन्नां दशांदशंजहातिसज ३७ इतिश्रीवासिष्ठतात्प
र्यप्र०उत्प०स्थिनवतितमःसर्गः ९२ ॥ ॥ ॥ ॥

मनोत्र ब्रह्मणोऽजडोऽन्तर्गतो भूततैजसो विधिः ततो मोहादहंकारस्ततो चिन्मयमित्यपत्ति मनउपक्र
ममेवसर्गक्रमं प्रागुक्तं प्रपंचयिष्यु विधिमुपसंहरति इतीति भगवता परमेष्ठिना अनाख्या

तन्मनस्तन्मात्रकल्पनपूर्वकं संनिवेशं भवति ततस्तैजसः पुरुषः संपद्यते सोयं ब्रह्मेत्यानि
नाम रूपवान् तेन रामस्यायं परमेष्ठी तन्मनस्तत्वं विद्धि समनस्त्वाकारो भगवान् ब्रह्मा संक
ल्पमयत्वाद् यदेव संकल्पयति तदेव पश्यति ततस्तेनेयमविद्यापरिकल्पिताऽनात्मन्यात्मा
भिमानमयी ततेन ब्रह्मणा गिरितरुजलधिमयाभिरं क्रमेण जगत्परिकल्पितमिति संक्र
मेण ब्रह्मतत्त्वादियमागतास्तृष्टिरमतएवागतेयमित्युच्यते ७ ॥ श्रीरामसमर्थः ॥

नं सूक्ष्मत्वान्नामबंधानर्हं सिवं प्रपंचरूपं चलनात्मकं निर्विकल्पकज्ञानकाशित[illegible]स्फुरो
ते तत्कालेन स्वयमेव संकल्पविकल्पनात्मकमननसामर्थ्यादिवेन घनतां प्राप्तं तन्मात्राणि
सूक्ष्मभूतानि तत्कल्पनापूर्वं सन्निवेशं स्वापरूपं ॥ ॥ ॥

शरीरमिव वासनामयं पुरुषाकारं ततः सन्निवेशोपाधेस्तदुपहितः पुरुषश्चात्मा तैजसः तैज
सः तेजः प्रधानलिंगसमष्ट्युपाधित्वात् सोयं ब्रह्मा परमेष्ठी तस्य जगत्सर्गसंकल्पकर्तामनो
रूपत्वाद्देवस्याहन्तेनेति ननु तत्संकल्पाकाशगं दुःस्वप्नतोजीवनांतरभिमानस्तत्कुतस्तत्राहत्त
तस्तेनेति अज्ञाविद्या अन्यया अग्रहणलक्षणया ध्यासरूपा कार्याविद्या इति अनयाशीसाब्रह्मत्व
त्वाद्विवेकरसादागतापि अन्यतो जडा प्रधानपरमाणवादेः सकाशादागतेति ताकिकैर्लक्ष्य
ते ॥ ७ ॥

1008

एकैकस्यानेकोपादानेकोपादानकल्पनागौरवान्नपरवान्नपरमाणुकारणतावादोयुक्तः। वि
नाकर्त्तारं जडसज्जगद्वैचित्र्यरचनानुपपत्तेरसंगोदासीनस्य कर्त्तृत्वानुपपत्तेश्च न प्रधान
कारणतावादोयुक्तः चित्तो जडाकारपरिणामायोगान्न विज्ञानपरिणामवादोयुक्तः। प्र

तस्मात्सर्वपदार्थानां त्रैलोक्योदरवर्तिनां असत्तिर्ब्रह्मणो रामतत्त्वं गायन्ति वाणिवार्थैन्तु ८
पएवमनुसन्नेजगत्तियाब्राह्मण्याश्चित्स्मनोरूपिणी साहंकारेपरिकल्प्य ब्रह्मा ब्रह्मतामेति ९

मस्यचक्कापि कारणत्वादर्शनान्नतत्कारणतावादोपि युक्तः। सर्वेष्वपि कल्पेषु समाणाभावा
द्यनान्यतद्रूपमागतासृष्टिरिति निर्णीते कोपि मायाणुपात्ताघवाच्चानियमायाश्शक्तिकब्र
ह्मविवर्त्तवाद एव परिशिष्ट इत्याशयेनोपसंहरति तस्मादिति ८ यत्तु सत्तिप्रकारः एवं ज
नेयारीसातामेवाह अनुदस्यादिना विवर्त्तत्वादेव परमार्थतोऽनुसन्धेजगति अहंकारस
महत्त्वपाथो ब्रह्मसंविष्टमिव परिकल्प्य ब्रह्मतां परमेष्टितामेति ९ ॥ श्री ॥ छ ॥

अन्याः व्यस्तहंकारोपहिताश्चिच्छक्तयश्चिदाभासाः पितामहरूपेण मनसा समष्टिमनोभावेन स-

यास्तन्मात्रश्चिच्छक्तयः सर्वशक्तेरभिन्ना एव कल्प्यंते जगत्तिस्फारतां नीताः पितामहरूपेण मन-
सा समुल्लसंति एते सहस्रशोपि परिवर्त्तमाना जीवा उच्यंते ते निमुत्थिता एव चिन्नभसो नभसित
न्मात्रैरावलिता गगनपवनांतर्वर्तिनः प्रसृत्य दशाविधायेभ्यः तजात्तयोमध्यत पाम्मासोत्तिष्टंति
तस्मा एव प्राणशक्तिद्वारेण प्रविश्य शरीरं स्थावरजंगमं वा पिबीजतां गर्भं त्तितदनुयोनितो
जगत्ति जायंते तेन तदनुकाकृत्ताला यमोगेनो सन्न वासनाप्रवाहानुरूपकर्मफलभागिनो भवं-
ति ततः कर्मरज्जुभिर्वासनावलिताभिर्बद्धशरीरा भ्रमंतः संसारे निनिपतंति चिवदुःखेवेत्ताभ
नजोगतत्यः ९६ ॥

यमं समुल्लसंतीत्यर्थः तेरह चिन्नभस एव समुत्थिताः नभसि मायाकाशे तन्मात्रैर्भ्रांतिमात्रे।

1010

पार्थिभिराविलितसंत: गगनस्य पवनस्य वह्नेर्द्धहदिभेदैर्भिन्नस्य चांतस्कंध भेदस्य चांतर्व
र्त्तिनो ये चतुर्दश विधा लोकास्तेषु यादृशस्तज्जात मध्ये चर्त्तित या या दृश वासना कर्माभ्या
सेये जीवास्तिष्ठंति तस्मा एव तेन तज्जाते: प्राण शक्ति द्वारेण शरीरं स्थावरं जंगमं वा प्रविश्य रे
तोरक्तादिस्तेषां बीजतां गच्छन्ति न सः साध्यै साधक वासना संवलिताभिः प एष पुरुष कर्म्मरज्जु
भिर्बद्धं शरीरं लिंग शरीरं येषां तथाविधा: स्तत: प्रोत्पत्तं स्कुत्तम लोकान्निपतंत्ति ति रयेषु वाक
मत्ति वासनयो भ कामराग एव बीज मिति तन्मया एव जीवाद्वतो हृदये वेदू तितत्तथा च श्रुति:
काममय एवायं पुरुष इति १६ ॥

५

कर्मानुसारिजन्म परं परामेवमोक्षाकांक्षाणां चाननुकंपिधैः प्रपंचयंति काश्चिद्भूतजातयस्तज्जीवाः
जननंजननजन्मानि तत्सहस्राणपंतोऽवधिस्तत्त्वबोधस्य यासां तथाविधाः सत्त्वः संसारे पतं
ति ततो मुक्ततर्थः वनपर्णविदिसादिपूर्वोत्तरान्वपि १७ काश्चित्तु चित्तसत्तायाज्ञानेनमोहि

काश्चिज्जन्मसहस्रांतः पतंतिवनपर्णवत् कर्मवासापरिम्लांतालुठंतिगिरिकुक्षिषु १७ अ
प्रमेयभवाः काश्चिच्चित्तसत्ताज्ञानमोहिताः चिरजातानवंतीह बहुकल्पशतान्यपि १८ काश्चित्क
तिपयातीतामनोरमभवांतराः विहरंतिजगत्यस्मिन्नशुभकर्मपरायणाः १९ काश्चिद्विज्ञात
विज्ञानाः परमेवपदं गताः वातोद्धूताः पयोमध्यं सामुद्राद्बुद्बुदाइव २० ॥

ताञ्जत एवाप्रमे
यागण्याद्यपरिच्छेद्यानि भवजन्मानि यासां तथाविधाश्चिरजाताः सत्त्वः इह संसारे बहुकल्पश
तान्यपि भवंति १८ कतिपयान्यतीतान्यमनोरमाणि भवांतराणि जन्मानि येषां तथाविधाः स
त्त्वः सांप्रतं शुभकर्मपरायण[illegible] विहरंति तेऽस्मैरेव जन्मभिर्मोक्ष्यंत इति शेषः १९ काश्चित्त्व
तः पूर्वमेवमुक्ताः इत्साह काश्चि[illegible]रिति वातोद्भूताः सामुद्राविरवः पयोमध्यं समुद्रमिव प्रविशं
ति २०

त्क्रमुपसंहरति उत्पत्तिरित्यादिना २१ २२ नानादिक्षु नाना देशेषु नाना कालेषु नाना शैल
कंदरेषु चारिण्या कर्मफलभोगसंचारवल्ली रचिता तैस्तैर्मे वैचित्र्यैर्विहिता सम्भ्रमाः सर्वतो
भ्रमायया परमार्थतस्त्वसती २३ इत्थं संसारवल्लीप्रपंचं तदुच्छेदोपायमाह विक्षुब्धविक्षेप

उत्पत्तिः सर्वजीवानां अभिती हृब्रह्मणः परात् आविर्भावतिरोभावभंगुराणवभाविनी २१ वास
नाविषवैषम्यवैधुर्यज्वरधारिणी अनंतसंकटानर्थकार्यसत्कारकारिणी २२ नानादिग्देश
कालांतशैलकंदरचारिणी रचितोत्तमवैचित्र्या विहितासंभ्रमाऽसती २३ एषा जगज्जांगल
जा एचवल्ली सम्यक्समालोककुठारहता वल्ली वविक्षुब्धमनः शरीराभ्र योनसंरोहति एम भद्र
२४ मोक्षोपाये उत्पत्तिदर्शने सर्गः ९३ ॥

बहुलं मन एव शरीरं स्वरूपं यस्यास्तथाविधा एषा जगज्जांगलस्य रण्यस्य मोहजांगलस्य जा एववृक्षाजरल्लता सम्यक् समालोकस्तत्त्वसाक्षात्कारस्तल्ल
क्षणेन कुठारेण हता छिन्ना सती भूयो न संरोहति भव्य आत्मज्ञानोच्छेदा रिति भावः २४ इति श्री
वासिष्ठतात्पर्यप्रकाशे उत्पत्तिप्रकरणे त्रिनवतितमः सर्गः ९३ ॥ ७ ॥

५

1013

दूसाहद्धादश्याधाभिन्ना वर्णंप्तिज्ञीवजातयः उपाधिगुणचैचित्र्याच्चिरात्चिर विमुक्तिगाः पूर्वो
क्तेज्ञीवानांचिरात्चिरमुक्तिविभागेरामसविरो पुञ्जिन्नासांल्लिंगेरूपलक्षतद्विस्तरेणवक्ष्येच
सिद्धत्वाचत्तमेसादिना सात्विकत्तामसराजसभेदेनोत्तमाधम मध्यमानांपदार्थानांज्ञीवोपा
धीनांद्रत्तस्तत्तोगुवनभेदेषुयाउसन्तयः सङ्कथितास्तासांश्रयवक्ष्यमाणेविभागोस्तितंवक्ष्यामि

श्रीवसाष्टव० उत्तमाधममध्यानांपदार्थानामित्तस्तत्तः उसत्तीनांविभागोयंमयावक्ष्यामिराघ
व १ इदंप्रथमत्तोसन्नोयस्मिन्नेवहिजन्मानि इदंप्रथमत्तानाम्नाशुभाभ्याससमुद्भवा २

प्रभिवसर्गः १ इदंप्रथमत्तागुणपीवरी ससत्वाअधमसत्वाअत्यंतत्तामसीराजसीराजससात्विकी
राजसराजसीराजसत्तामसीराजसात्यंतत्तामसीतामसीतामससत्वात्तमोराजसी अत्यंतत्तामसी
ति वक्ष्यमाणभेदेषुअंत्ययोर्भेदयोः पंचमनवमयोरत्तर्भावात्द्वादशभेदाः परिशिष्यंतेतेषां
दर्शयति इदंप्रथमत्तोसत्त्वाइत्तियोजीवः पूर्वकल्पेचरमजन्मनिशमदमादिसर्वसाधनगुण
संपन्नोज्ञानयोग्यउत्पन्नस्तस्यसाजीवजातिरिदंप्रथमत्तानाम्नासर्गः शाकुल्यायशुभाभ्यासस
मुद्भवाहिसातस्मिन्नेजन्मनि मुक्तिभाणिसर्गः २ ॥ । ॥ ॥ ॥

सैवचेत्साक्तनवैराग्यमांद्याच्छुभलोकेच्छा हतोपासनकर्मादिसंवलिता अत एव विचित्र
संसारवासनया भोगव्यवहारिणी भोगैर्वासनाक्षये कतिपये देशपंचाभिरेव वैजन्माभिर्मो
क्षंप्रापयती निःशेषः ख्यातिहेतोः साशान्तिराना शुभयगुणे पवित्रखाकृण्यपीवरी तु सैस्यार्थः

शुभलोकभया सा च शुभकार्यानुबंधिनी सा चेद्विचित्रसंसारवासनाव्यवहारिणी ३ भवैः
कतिपयैर्मोक्षमित्युक्ता गुणपीवरी तादृक्फलप्रदानेक कार्याकार्यानुमानद ४ तेनरामस
सत्वेत्तिशोच्यते सा हृत्तात्मभिः अथ चेद्विचित्रसंसारवासनाव्यवहारिणी ५ असंतकलुषाज
न्मसहस्रेष्वनिभागिनी तादृक्फलप्रदानेक धर्माधर्मानुदा तु सा । ६ ॥

३ तृतीयामाहतादृ
शीति तादृक्शब्देनाशित्तनः तादृशानि ताद्रशानि यानि सुखदुःखफलानि सुदानलक्षणैरे
कैर्मुख्यालिंगैः प्राकृताभीयपयोः कार्याकार्ययोः पुण्यपापयोरनुमानं दत्ते अनुमापयित्री सा पिक्ष
मा सत्वोपचयेरंगावधिर्जन्मभिर्मोक्षभागित्यर्थात्कथ्यते ४ चतुर्थीमाह अथेति ५ असंत
कलुषाज्ञाकृतकल्मसंचित्त बहुदुष्कमर्दुर्वासनामालिन्यवती तादृगिति साद्विशाग्वत् ६

पंचमी मा हसैवेति सैव तादृग्लक्षणैव सती अध्यात्मशास्त्रश्रवणमुखादस्मिन्कल्पे संदिग्धमोक्षा क
थंचित्संभावितमोक्षा ७ षष्ठी लक्षयति अनघत्तनेति या तु जाति अनघत्तनजन्मा पूर्वकल्पानवा
सनातनुसारिण्यत एव तादृशाचरित्रकारिणी द्वित्रिभवांतरा एतत्कल्पीयद्वित्रिजन्ममध्ये मध्य

असावधमसत्वेति तेन साधकैर्निरूप्यते सैव संख्यातिगानंतजन्मदूरं दानंतरं ७ संदिग्धमोक्षा
यदितरोच्यते संततामसी अनघत्तनजन्मा तु जातिस्तादृशकारिणी ८ योसप्तिमध्यमा पुंसोरा
मद्वित्रिभावांतरा तादृक्कृत्यतु सात्वेके राजसी राजसत्तमः ९ अविप्रकृष्टजन्मापि सोच्यते हृ
तबुद्धिभिः साहित्यसत्तमात्रेण मोक्षयोग्यामुमुक्षुभिः १० ॥

मामनुष्यादिरूपाप्याउत्सति स्ता
दृक्कृत्यतिरत्नरूपस्वर्गनिरक्कारिण्यापिका संदिग्धमोक्षा सा राजसी सर्पः ८ ९ सप्तमी लक्षय
ति अविप्रकृष्टेति सा यदा राजसदुःखानुभववैराग्यादिसंपत्साऽविप्रकृष्टज्ञानजन्मा भवति त
दा तत्र सत्तमात्रेण मोक्षयोग्या मुमुक्षुभिः प्रोच्यते सैव मया तादृक्कृत्यलिंगकानुमानेन राज
ससात्विकी प्रोक्ते सर्पः १० ॥

अष्टमीं लक्ष्यन्ति सेवं चेदिति दत्तैरस्त्कमानुष्यात्तिरिक्तैरल्पैर्यक्षगंधर्वादिजन्मभिः क्रमाद्द्र
नप्राप्या मोक्षभागिनी चेद्राजसराजसी स्मृताः ११ नवमीं लक्ष्यन्ति सेवं जन्मशतैरिति १२ ता
दृगारंभा राजसतामस फलोपमोजक्रमोपासना धारंभवती दशमीं लक्ष्यन्ति सेवेति १३

तादृक्ष्वाप्यनुमानेन प्रोक्ता राजससात्विकी सैव चेदित्तैरल्पैर्जन्मभिर्मोक्षभागिनी ११ तत्ता
दृशी हि सा तद्वैः प्रोक्ता राजसराजसी सैव जन्मशतैर्मोक्षभागिनी चेद्विशेषिणी १२ तदुक्ता
ता दृगारंभा समन्द राजसतामसी सैव संदिग्धमोक्षा चेत्सहस्रैरपि जन्मनां १३ तदुक्ता
दृशारंभा राजसात्संततामसी भुक्त्वा जन्मसहस्रात्तु योऽस्ति ब्रह्मणोन्वयं १४ चिरमोक्षा हि
कथिता तामसी सा महर्षिभिः तज्जन्मनैव मोक्षस्य भागिनी चेत्तदुच्यते १५ ॥ श्री ॥

५

एकादशीमाह भुक्त्वेति ब्रह्मलोकहिरण्यगर्भधाम्नि उषित्वा कल्पादावाविर्भावः १४ चिरमोक्षा
कल्पान्तरमोक्षा द्वादशीमाह तज्जन्मनैवेति तज्जन्मना तामससप्तमजन्मना तामसेदानवं
पिशाचादिजन्मनि सत्ता कष्टलिप्त दक्षकर्मधारीनां ज्ञानं प्रसिद्धमिति भावः १५ ॥ छ

राजसतामसाश्चाग्यो कातस्माएवकामपी चापर्येण्वयो दशामाहभवेदिति १६ गुणत्रयैर्हि
तैरजस्तमो वहलफलक्षितेस्यर्थः १७ चतुर्दशीविधामाहपूर्वमिति १८ सर्वासामुपाधिद्वा

त स्तामससत्वेत्तिताद्दशार्हंभ्रष्टात्त्विनाभवेः कतिपयेमोक्षभागीनीचेत्तदुच्यते १६ तमोरा
जसरूपेतिताद्दशैर्गुणत्रयैर्हितैः पूर्वजन्मसहस्रष्टापुरोजन्मशतैरपि १७ मोक्षायोग्यात्तत्त्
शोकात्तद्दैतामसतामसी पूर्वजन्मलक्षणाजन्मलक्षेपुरोपिचेत् १८ संदिग्धमोक्षात्तदसौ
प्रोच्यते संततामसी सर्वाएताससमायांतिब्रह्मलोकंभक्तजातसैयः १९ किंचित्त्वचालितामोगा
सयोराशेर्भिन्नोभयिः सर्वाएवविनिष्क्रांताब्रह्मलोकजीवराशयः २० स्तेजःसंदितामोगाद्दीपादि
वमरीचयः सर्वाएवसमुत्पन्ना ब्रह्मलोकेभक्तपंक्तयः २१ खमरीचिवलोभ्दृताज्वलितांग्नेःकणाः
इवसर्वाएवसमुत्पन्ना ब्रह्मलोकदृश्यदृष्टयः २२ मंदारमंजरीरूपांम्बुद्रविबाह्विशेवुः सर्वाए
वसमुत्पन्ना ब्रह्मलोकदृश्यादृष्टयः २३ यथाविटपिनश्चिन्नास्तद्रूपाविटपश्रियः सर्वाएवसमु
त्पन्नाब्रह्मलोकजीवपंक्तयः। २४॥

राब्रह्मसंभवत्वंब्रह्मलोनेदसंभावनायदृष्टांतमेदैर्द्रढयन्नाह
सर्वाएताइति १९ २० २१ कणाःस्फुलिंगाः [illegible] २३ विटपश्रियःशाखाशोभा २४

१० २५ एवंमात्रांशाभावकल्पनयाऽभेदयोग्यत्तांसदनूद्योपाधिमिथ्यात्वाऽसदनृनिनाभेदंद-
र्शयितिअह्मसैवेति २६ उपाधिमिथ्यात्वंतदनन्याभ्योपपादनेनदृष्टांतेदर्शयितुं जगतोब्रह्म

कटकांगदकेयूरमुकुटस्य: कनकादिव सर्वएवोत्थितारामब्रह्मणोऽधीश्वराश्रयः २५ निर्झ
रादमलोद्योतात्सयसामिवबिंदवः जलस्येवाखिलारामभूतसंततिकल्पना २६ आकाश
सघटस्थालीरंध्राकाशादयोयथा सर्वएवोत्थितालोककल्पनाब्रह्मणः पदात् २७ साकि
रावर्त्तलहराबिंदवः पयसोयथा सर्वएवोत्थितारामब्रह्मणोदृश्यदृष्टयः २८ ममत्वस्मात्त
रंशिल्पायथाभास्करतेजसः सर्वदिग्दशोदृष्टमतिरिक्तानरूपतः शीतरश्मेरिवज्योत्स्ना
स्वालोकइवतेजसः एवमेताहिभूतानांजातयोविविधाश्रया ३० यस्मादेवसमायांतितस्मि
न्नेवाविशंतिच काश्चिज्जन्मसहस्रांतेजन्मरूपाश्ववस्थित ३१ ॥ छ ॥ छ

कार्यत्वमाहसर्वएवेत्यादिना २७ २८ २९ स्वस्वआलोकः प्रभवउपसंहरत्येवमित्या
दिना ३० समायात्याविर्भवंतिविशंतितपाधिविलयेनैक्यमापद्यते काश्चिदित्यादिःप्रागुक्त
स्यानुवादः ३१॥

तस्येश्वरात्मनो भगवतो ब्रह्मणः व्यवहारवशोरूपश्रियम् उपाधिरूपाण्येवमी यासां तथाविधाः
प्रागुक्तजीवजातयः निपतंति तिभवान्द्वांतरे भ्रमंति पावकोल्याः कणघटाः स्फुलिंगसमूहा इव
॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे ० प्र० चत्तनवतितमः सर्गः ९७ अप्रबुद्धजनौघस्य प्रबोधाय
नवस्कत्तः कर्मकर्तॄः सहोद्भूतिराशिष्वेह समर्थ्यति ब्रह्मण एवकल्पादौ सर्वजीवजातमावि

भूतं जगत्सु विविधेषु विचित्ररूपास्ततः सेच्छया भगवतो व्यवहारवस्तः आयांति यांति निपतंति
तयोस्तत्तं ति रूपाश्रियः कणघटा इव पावकोल्याः ॥ मोक्षोपा० ब्रह्मणः सर्वसमुत्पत्त इति क
थनं सर्गः ९८ वसिष्ठ अभिन्नौ कर्मकर्तारौ समसमेव परात्पदात् स्वयंप्रकटतां यातौ पुष्पमोदैत

गौरव ॥१॥

भैवंतौ स्तुक्ति व्याजेन ब्रह्मैवोपाधिषु जीवभावेन प्रविष्टमिति दर्शितं आगंतुकेन जीवभावेनस्था
नव्कर्मनिमित्तत्वं कर्तृत्वं तस्य प्राक्तनकर्मसापेक्षत्वात् तदर्थं जीवनादित्वाभ्युपगमे तु न ब्रह्मणः
प्रागुक्तऔपाधिको जीवभावः समर्थयितुं शक्य इत्यभयमापि रोधं प्रसक्तं दृष्टिभेदाश्रयेण परि
हरिहैष्यन्नादौ अभिसंधिः परिच्छेदाबाधो इति कर्मणासहोत्पत्तिपक्षं दर्शयति अभिन्नाविति अन्योन्य
तादात्म्यकत्वेनादभिन्नौ अतः समस्युगपदेव परात्परात् ब्रह्मणः सकाशात् स्वयं स्वस्वभाववशा

देवसर्गादौ प्रकटतां यातौ तथा च भगवतो वामनं करखिन्नकमलिनीलोकस्य सम्भावरूपप्रवर्त्त
तइति १ तदाविर्भावे तादात्म्याध्यासे च जीवानां स्वभाव एव चित्तं स्वाज्ञानमेव हेतुरिति सदृ
ष्टांतमाह सर्वेति २ अत एव सृष्टिवादेय मज्ञसंमत व्यवहारभूमावेव न परमार्थपदे तदाह
असंबुद्धेति ३ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्तिरित्येषा परमार्थ

सर्वसंकल्पनाशेन जीवाद्ब्रह्मणि निर्मले स्फुरंति वितते व्योम्नि नीमिरे वाड्डवस्तुषः २ अ
सबद्धजनाचारा यत्र राघव दृश्यते तत्र ब्रह्मण एव सन्ना जीवाद्युक्तयः स्थिताः ३ संसबु
द्धजनाचारे वक्तुमेतन्न शोभनं यद्ब्रह्मण इदं जातं चेति राघव ४ काचित्कल्पनया वन्न
नीता राघव मयां उपदेशोपदेशार्थाम् सा च द्वैतेन शोभते ५ ॥

तात देत्तक्कल्पापूर्वमिन

परमनंतरम चात्मयमात्मा ब्रह्म सर्वमिति श्रुत्यादि ग्रौत पारमार्थिकदृशा न तु न जगतो जी
वानां कर्मणां वा तत्संसारित्वं तन्निषेधो वाच कुं शक्य इत्याह संप्रबुद्धेति ४ तर्हि परमार्थेऽपि
देवाकेशान्नोकि भज्ञदस्पुपपाद्येस गाधिक्तेः प्रयोजनं तत्राह काचित्किं ताकल्पनाद्वितीयक
ल्पना ५ ॥

दानां शौच्यां द्वैतकल्पनां यावद्व्यवहारकालमंगीकृत्येत्यर्थः वेद्मीति निश्चये वाइति शब्दः सकारा
द्यावत्प्रमाणपरिशोधननिश्चयेन यावत्प्रमेयनिर्णयसंशयेन सकारेणांगीकृत्येत्यर्थः ६ लोके
प्यभ्युपगमवादो बहुशः प्रसिद्ध इत्याह इति दृष्टइति यद्यभ्युपगतं द्वैतं तत् द्वैतं तर्हि क्रममपोद्य

अतो भेददृशां दानोमंगीकृत्योपदिश्यते ब्रह्मैत्यदमेतज्जीवाद्यैवेति वाचामयं क्रमः ६ इति दृष्टो
निराशे गाद्ब्रह्मणो जायते जगत् तज्जं तदेव तद्धेतुगतं दुःखबोधतः ७ मेरुमंदरसंकाशा बह
वो जीवराशयः उत्पद्योत्पद्य संलीनास्तस्मिन्नेव परे पदे ८ अथानंताः स्फुरंत्येते जायमानास्स
हस्रशः नानाकुंभकुंभेषु तत एवान्यवारिभेदाः ९ जीवौघा ... विषंति ममेधाविवनांकु
राः तत्रैव लयमेष्यंति ग्रीष्मे मधुरसा इव १०

नेत्रत्र हि निरासंगात्संगाद्धितीया ब्रह्मणो ज
जायते इति अयमंश्रुत्यादितेयत्तज्जं तदुपादानकं तत्तदेवयतः तत्तद्धेतोः आकुहेतुगतं उपा
दानसद्धतरेव ... निरश्यायामपि हेतुगतत्वात् तावन्मात्रमपि दुःखबोधतो ... तिज्ञाना
सयमीवभातीत्ति बोधादित्यर्थः ७ उदुपादानकत्वं तु कालत्रयेपि तत्रैवोपपल्लीयमान
त्वाप्सिद्धमित्याह मेर्विंत्यादि चतुर्भिः जीवशब्देन तदुपाधयो गृह्यन्ते ८ ॥ ९ ॥ १०

॥ गूढाभिसंधिमुपसंहरति पुष्पमोदाविति अभिन्नाविति पुष्पमोदाविति दृष्टांतविशेष
णलाक्षात्संसमायातेऽपि नित्वङ्गाङ्क्षीति कविश्रेषणभित्तिनपुंसकमनपुंसके नेति नपुंसकेऽक

तिष्ठं स्पजस्तंकालेषु तत्र एवान्येचभेदरिद्राः नानाकुंकुमुकुंजेषु पादपेषुविपल्लवाः ॥ पुष्पा
मोदाविवाभिन्नौ पुमान्कर्मचराचरं परमेश्वरात्समायातेत्तत्रैवविश्लिष्टं स्थानैः १२ दृष्टमे
तज्जगत्सर्वस्मिन्दैत्योरगनरामराः अन्दवं समवाभावैः प्रस्फुरंतिपुनःपुनः १३ ॥ श्री

रोषः १२ सहोत्पत्तिकल्पनायां दृष्टानुसारोऽप्यस्तीत्याह दृष्टमेतदिति वस्तुतस्त्वाजनवा
ऽपि नावैवसिनाभृत्तमाभोगोपाधिभिरुन्दवंतितत्कालं प्रस्फुरंतिसंचलंतिचेतिसहोत्प
त्तितादात्म्ययोः प्रसक्तं दर्शनात् १३ ॥ ॥ ॥ ॥

1023

तथा च तदुक्तेन क्रमेण न यावज्जन्मान्तरीयं तत्कर्तृपूर्वकत्वात्तेषां ततः परिशेषात्स्वात्माज्ञा-
ज्ञानमेकमेव साहाय्ये हेतुरिति अयमभिसंधिः ननु कर्तृत्वादिनावच्छिन्नस्य कर्तृत्वस्य स्वाभावि-
कत्वे अनादिसंसारावस्थायां मोक्षोपायसहस्रैरप्यपरिहार्यतया निर्मोक्षप्रसंगात् औपाधिक-
त्वे सत्युपाधिरविद्यैव वा स्यादन्यो वा आद्ये फलतः सोऽयमात्यंतिकपरिशेषपक्षान्तरगतिः किंच अवि-
द्याया आत्मनि कर्तृतापादकत्वं स्वत एव वा जन्मसापेक्षा सती विद्या कर्तृतामापादयति स एव

हेतुर्विहरणे तेषामात्मविस्मरणाद्यते न कश्चिद्यतते साधो जन्मान्तरफलप्रदः ॥१५॥

वोपाधिः स्यान्नाविद्यानादिरुपाधेरुपाधिर्भवतीति द्वितीयेऽपि सत्युपाधिरविद्याकार्यं स्वितं तत्रो वा
स्यात् तत्रैव यदनादिस्ताहंसुखदुःखयोरपि कर्तृतामापादयेत् यदि साहंकारस्तदुपाहित
कार्तस्वरूपमपि साध्येवेति तेनानादिकर्तृत्वसिद्धिः अविद्याकार्योपाधिपक्षेऽप्ययमेव दोष इति निस
स्यात्मनः कर्त्रुपाधिसंबंधस्य प्रतिकल्पं प्रवृत्तिरिति च भेदात्तदधीनसोपाहितकर्तृस्वरूपस्य
कर्मसहशक्तिमदुपाधितादात्म्यरूपता च तत्रात्मविस्मरणमेव बीजमिति पक्ष एव यो नि
कर्तृणा परिशिष्यते एतेभ्यो न तेभ्यः समुत्थाय तान्येवानुविनश्यतीति श्रुतिरप्यनुकूलेति
१४॥

० अस्मिन्नर्थेऽनुपपत्तिमुपपादयिष्यन्नात्मस्तदुपयोगीनि भिक्षाचर्यितं शास्त्रलक्षणमाह।
अविसंवादिनेति अलौकिकेऽर्थे धर्मे ब्रह्मणि च प्रमाणं श्रुतिः तत्राभावात् दृष्टेर्ये प्रांते: सामाजिकदृ
ष्टिभिर्वीतरागैरसमन्वादिभिर्धर्ममधिकृत्य प्रवृत्तस्मृतिलक्षणमविसंवादिना जैमिनीयादिकं तन्त्र
सिद्धान्तापकलापेन यद्यद्विनिर्णीतं निर्णीय निबद्धं स्मृतिपुराणकल्पसूत्रेतिहासादि तच्छा

श्रीरामउ० अविसंवादिनाप्येयप्रमाणिकदृष्टिभि वीतरागैर्विनिर्णीतं तच्छास्त्रमितिक
थ्यते १५ महासत्त्वगुणोपेता मेधाविनः समदृष्टयः अनिर्देश्यकलोपेताः साधवस्ताउदाहृताः १६
दयांहिदृष्टिबलिनां ब्रह्मप्रियेसर्वकर्मणं साधुवृत्तं तथाभ्यासं सर्वदेवानुवर्तते १७॥ श्री॥

स्त्रमिति कथ्यते तथा च श्रुतयस्तन्मूलस्मृत्यादयश्चालौकिकेऽर्थे मानमिति आशयः १५ एवं
साचारोऽपि मानमिति वक्तुं सतां लक्षणमाह महासत्त्वेति महत्त्वात् संततविशुद्धेन सत्त्वगुणेनोपे
ताः धीराः विषयैरक्षोभ्याः नैष्काम्यानुकम्प्याः समदृष्टयः अरागद्वेषाः अनिर्देश्याः शब्देनाभिल
पितुमशक्याः यानि रतिश्रयानंदब्रह्मसाक्षात्कारकला तदुपेताः ते साधवः संतः स्मृताः १६
साधुवृत्तमुक्तं लक्षणं नासतामाचारः शास्त्रं श्रुतिस्मृती चेति द्वयं बालानां अज्ञातत्त्वानां

साधः स्वर्गमोक्षोपयोगाय संव्यवहारस्य पर्यन्त स्य योजनं शास्त्रं सर्वैः शिष्टादृत्त शेषः १८ इह अ
स्मिन् लोके प्रामाणिक जने वेदे च इदं यं कर्म यत् इति कर्त्ति निरुक्त प्रवादः अस्तीति शेषः प्रवादमे
वाभिलप्य दर्शयन् विवक्षित मर्थमाह यथेत्यादिना पर्यायेण अंगप्रधानेन हेतुभावेनेत्यर्थात्
१९ तदेव स्पष्टमाह कर्मणेति प्रणीयते निष्पद्यते २० २१ कर्मैव वासनापि प्राक्तनी कृत्तेहि

साधकः संव्यवहारार्थं शास्त्रं यो नानुवर्तते बहिः कुर्वन्ति तं सर्वे स च दुःखे निमज्जति १८ इह केन
च वेदे च कर्त्ति रित्यं सदाप्रभो यथा कर्म च कर्ता च पर्यायेण इह संगतौ १९ कर्मणा क्रियते कर्ता
कर्त्रा कर्म प्रणीयते बीजांकुरादिवान्न्यायो लोके वेदे च स्थित एव सः २० कर्मणा जायते जन्तुर्बी
जादिव नवांकुरः जन्तोः प्रजायते कर्म पुनर्बीजमिवांकुरात् २१ यथा वासनया जन्तुर्नीयते तेन
व पंजरे तद्वासनानुरूपेण फलं समनुभूयते २२ एवं स्थिते कथं नाम जन्म बीजेन कर्मणा
विनोत्पत्तिस्त्वया प्रोक्ता भूतानां ब्रह्मणः परात् २३

तुरित्साह्ययेत्ति समनभूयते तेन जंतु
नेति शेषः २२ एवं आत्मकार्य काम्यस्य कर्मणः सहोत्पत्ति पक्षमाक्षिपति एवं स्थिते इति सहो
त्पत्ति पक्षे हि प्राक्तनं कर्म नि नोत्पत्तिरित्ति फलितं तत्त्वायुक्तं साधुकारी साधुर्भवति पापकारी पा

पक्षान्तरे पापो भवति पुण्यो वै पुण्येन कर्मणा भवति पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन क-
र्मणा जायते जन्तुरित्यादिश्रुतिस्मृतिशिष्टप्रवादविरोधादित्यर्थः २३ अनेन सहोक्तिपक्षेण एत-
योः जीवकर्मणोः जगति जातानामप्रामाणनिरूढा अविनाभाविता अन्वयव्यतिरेकशालिनी परस्प-
रहेतुफलिताति रस्कृता भवतीत्यर्थः २४ कर्मणां अकारणे अद्दृष्टत्वात्खात्तिशिक्तवारणमने

पक्षेणानेन भगवन् न भवतो जन्मकर्मणोः तिरस्कृत जगज्जाता सा चाविनाभाविता तयोः २४ ब्रह्मण
कारणे ब्रह्मन् ब्रह्मादिशुफलेषु च कर्मणां फलमस्तीति द्वयं लोके समार्जितं २५ संजाते संकरे लो-
के मखिफलदायिषु मा त्वसन्न्याये विलसति नाशएवावशिष्यते २६ किं तत्त्वं तं भवते बोध गवन्ब्र-
ह्मतत्वतः एनं मे संशयस्कारं छिंधि वेधाविरांवरं २७

मायाशबले ब्रह्मणि वियदादिस्थूलदेहं ५

तभोगायतनसर्गरूपं फलमस्ति तत्फले शुब्रह्मादिशु हिरण्यगर्भादिस्थूलसूक्ष्मोपाधिषु भो-
गतत्सामग्रीसर्गरूपं फलमस्तीति लोके प्रसिद्धं प्रवादद्वयं त्वया समार्जितमित्यर्थः २५ दोषां-
तरमप्याह संजाते इति कर्मस्वि फलदायिषु निष्फलेषु सत्सु नरकादिभयाभावान्मत्तैरिव बल-
वाद्भिर्हिंसनं भसणे त्वसन्न्याये विलसति सति २६ तत्तस्मात् हे ब्रह्मन् तत्त्वतः यथार्थतो ब्रूहि हतत्त्वं
कर्मफलाम्मनो भवसे यत् किं वा किं वा नेति एनं संशयं छिंधि २७ ॥

(1027)

